
॥ श्रीः ॥

॥ सूर्यनमस्कारः ॥



चेन्नपुर्याम्

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितः

१९४१

All Rights Reserved.

PRINTED BY

V. VENKATESWARA SASTRULU

OF V. RAMASWAMY SASTRULU & SONS

AT THE 'VAVILLA' PRESS, MADRAS—1941

॥ ओं नमो भास्कराय ॥

॥ सूर्यनमस्कारः ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओम् । गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपम-श्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीदसादनम् । श्रीमहागणाधिपतये नमः ॥

देवीगायत्री छन्दः । प्राणायामे विनियोगः । ओं भूः...सुवरोम्॥
एवंगुणविशेषणविशिष्टायां शुभतिथावस्माकं सहकुटुम्बानां क्षेमस्थैर्य-
विजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थ-
सिद्ध्यर्थं संज्ञाछायादेवीसमेत श्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायण-
प्रीत्यर्थमादित्यपुराणोक्तत्र्यृचविधानेन हरिहरब्रह्मात्मकस्य मित्रादि-
द्वादशस्वरूपिणोऽरुणादिद्वादशमासात्मकस्य द्वादशावरणसहितस्य
त्रयीमूर्तेर्भगवतः श्रीसूर्यनारायणस्य प्रीतिद्वारा मम शरीरे वर्तमान-
वर्तिष्यमाणवातपित्तकफोद्भवनानाकारणनिमित्तज्वरपाण्डुकुष्ठशूलाति-

सारधातुक्षयव्रणमेहभगन्दरादिनानामेहसमस्तामयनिदानहेतुभूतदुरित-क्षयद्वारा क्षिप्रारोग्यदीर्घायुरवाप्तय उद्यन्नद्येति त्र्यृचमन्त्रेण श्रीसूर्य-नमस्कारार्घ्यप्रदानानि करिष्ये ॥

अस्य श्रीत्र्यृचमहामन्त्रस्य । कण्वपुत्रः प्रस्कण्व ऋषिः । अनुष्टुप्छन्दः । मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसावित्रर्कभास्करा देवताः । उदात्तः स्वरः । ज्ञानं नेत्रम् । सूर्यस्तत्त्वम् । ह्रीं बीजम् । ह्रूं शक्तिः । क्रों कीलकम् । सौः संज्ञाछायादेवीसमेत-श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे पादार्घत्र्यृचाऽर्घ्यपूर्वकनमस्कारजपे विनियोगः ॥

ओं भूर्भुवः सुवः । ओं ह्राम्, उद्यन्नद्य मित्रमहः । ओं ह्रां, मित्राय नमः । अङ्गुष्ठाभ्यां नमः । ओं भूर्भुवः सुवः । ओं ह्रीम्, आरोहन्नुत्तरां दिवम् । ओं ह्रीं, रवये नमः । तर्जनीभ्यां नमः । ओं भूर्भुवः सुवः । ओं ह्रूम्, हृद्रोगं मम सूर्य । ओं ह्रूं, सूर्याय नमः । मध्यमाभ्यां नमः । ओं भूर्भुवः सुवः । ओं ह्रैम्, हरिमाणं च नाशय । ओं ह्रैं, भानवे नमः । अनामिकाभ्यां नमः । ओं भूः...वः । ओं ह्रौम्, शुकेषु मे हरिमाणम् । ओं ह्रौं, खगाय नमः । कनिष्ठिकाभ्यां नमः । ओं भू...वः । ओं ह्रः, रोपणा-

कासु दध्मसि । ओं ह्रः, पूष्णे नमः । करतलकरपृष्ठाभ्यां नमः । ओं भू...वः । ओं ह्राम्, अथो हारिद्रवेषु मे । ओं ह्रां हिरण्य-गर्भाय नमः । हृदयाय नमः । ओं भूः...वः । ओं ह्रीम्, हरि-माणं नि दध्मसि । ओं ह्रीं, । मरीचये नमः । शिरसे स्वाहा । ओं भू...वः । ओं ह्रूम्, उदगादयमादित्यः । ओं ह्रूम्, आदित्याय नमः । शिखायै वषट् । ओं भू...वः । ओं ह्रैम्, विश्वेन सहसा सह । ओं ह्रैं, सवित्रे नमः । कवचाय हुम् । ओं भू...वः । ओं ह्रौम् । द्विषन्तं मम रन्धयन्न् । ओं ह्रीम्, अर्काय नमः । नेत्रत्र-याय वौषट् । ओं भू...वः । ओं ह्रः, मो अहं द्विषतोरधम् । ओं

ह्रः, भास्कराय नमः । अस्त्राय फट् । ओं भूर्भुवः सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥

उदयगिरिमुपेतं भास्करं पद्महस्तं
सकलभुवननेत्रं नूत्नरत्नोपधेयम् ।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरगुरुमभिवन्द्यं सुन्दरं प्रार्थयामि ॥
ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।

केयूरवान्मकरकुण्डलवान्किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥

ओम्, आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवना विपश्यन्न् ॥ ओं भूर्भुवः सु...वरोम् ॥ अस्मिन् तीर्थमण्डले छायादेवीसमेतं श्रीसूर्यनारायणं ध्यायामि । आवाहनादिषोडशोपचारैः सम्पूज्य मानसोपचारान्निवेद्य ततो नमस्कुर्यात् ॥

ओं गणानां त्वा——सादनम् । श्रीमहागणाधिपतये नमः ॥

संज्ञाछायादेवीसमेतश्रीसूर्यनारायणस्वामिने नमः, इदमर्घ्यं समर्पयामि ॥

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः ।
सप्ताश्वः सप्तरज्जुश्चाप्यरुणो मे प्रसीदतु ॥

अरुणाय नमः, इदमर्घ्यम् ॥

सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

सञ्ज्ञाः...नमः, इदमर्घ्यम् ॥

भानो भास्कर मार्तण्ड चण्डरश्मे दिवाकर ।
आयुरारोग्यमैश्वर्यं श्रियं पुत्रांश्च देहि मे ॥

संज्ञा...नमः; इदमर्घ्यम् ॥

भास्कराय विद्महे महाद्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । संज्ञा...नमः, इदमर्घ्यम् ॥

सशङ्खचक्रं रविमण्डले स्थितं कुशेशयाऽऽक्रान्तमनन्तमव्ययम् ।
भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥

संज्ञा...नमः, इदमर्घ्यम् ॥

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्प्य मया भक्त्या गृहाणार्घ्यं नमोऽस्तु ते ॥
संज्ञाछायादेवीसमेतश्रीसूर्यनारायणस्वामिने नमः, इदमर्घ्यं समर्पयामि ॥

ओं भूर्भुवः सुवः । ओं ह्राम्, उद्यन्नद्य मित्रमहः । ओं ह्रां मित्राय नमः । इदमर्घ्यम् । ओं भू...वः । ओं ह्रीम्, आरोहन्नुत्तरां दिवम् । ओं ह्रीं रवये नमः, इदमर्घ्यं समर्पयामि । ओं भू...वः । ओं ह्रूम्, हृद्रोगं मम सूर्य । ओं ह्रूं सूर्याय नमः, इद-

मर्घ्यम् । ओं भूः...वः । ओं ह्रैम्, हरिमाणं च नाशय । ओं ह्रैं भानवे नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रौम्, शुकेषु मे हरिमाणम् । ओं ह्रौं खगाय नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रः, रोपणाकासु दध्मसि । ओं ह्रः पूष्णे नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्राम्, अथो हारिद्रवेषु मे । ओं ह्रां हिरण्यगर्भाय नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रीम्, हरिमाणं नि दध्मसि । ओं ह्रीं मरीचये नमः, इदमर्घ्यम् । ओं ह्रूम्, उदगादयमादित्यः । ओं ह्रूम्, आदित्याय नमः, इदमर्घ्यम् । ओं ह्रैम्, विश्वेन सहसा सह । ओं ह्रैं सवित्रे नमः, इदमर्घ्यम् । ओं भूः...

वः । ओं ह्रौम्, द्विषन्तं मम रन्धयन्न् । ओं ह्रौम्, अर्काय नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रः, मो अहं द्विषतोरधम् । ओं ह्रः, भास्कराय नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रां ह्रीम्, उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । ओं ह्रां ह्रीम्, मित्ररविभ्यां नमः, इदमर्घ्यम् । ओं भूः...वः । ह्रूं ह्रैम्, ह्रद्रोगं मम सूर्य । हरिमाणं च नाशय । ओं ह्रूं ह्रैं सूर्यभानुभ्यां नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रौं ह्रः, शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि । ओं ह्रौं ह्रः, खगपूषभ्यां नमः, इदमर्घ्यम् ।

ओं ह्रां ह्रीम्, अथो हारिद्रवेषु मे । हरिमाणं नि दध्मसि । ओं ह्रां ह्रीं हिरण्यगर्भमरीचिभ्यां नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रूं ह्रैम्, उदगादयमादित्यः । विश्वेन सहसा सह । ओं ह्रूं ह्रैम्, आदित्यसवितृभ्यां नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रौं ह्रः, द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम् । ओं ह्रौं ह्रः, अर्क-भास्कराभ्यां नमः, इदमर्घ्यं समर्पयामि । ओं ह्रां ह्रीं ह्रूं ह्रैम्, उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । ओं ह्रां ह्रीं ह्रूं ह्रैं मित्रविसूर्यभानुभ्यो नमः, इदमर्घ्यं समर्पयामि । ओं भूः...वः । ओं ह्रौं ह्रः, ह्रां ह्रीम्,

शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि : अथो हारिद्रवेषु मे । हरिमाणं नि दध्मसि । ओं ह्रौं ह्रः, ह्रां ह्रीम्, खगपूषहिरण्यगर्भ-मरीचिभ्यो नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रूं ह्रैं ह्रौं ह्रः, उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम् । ओं ह्रूं ह्रैं ह्रौं ह्रः, आदित्यसवित्रर्कभास्करेभ्यो नमः, इदमर्घ्यं समर्पयामि । ओं भूः...वः । ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । शुकेषु मे हरिमाणम् । रोपणाकासु

दध्मसि । ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, मित्रविसूर्यभानुखगपूषभ्यो नमः, इदमर्घ्यम् । ओं भूः...वः । ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, अथो हारिद्रवेषु मे । हरिमाणं निदध्मसि । उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम् । ओं ह्रां (६) हिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः, इदमर्घ्यं समर्पयामि । ओं भूः...वः । ओं ह्रां (१२) उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे । हरिमाणं निदध्मसि । उदगादयमादित्यः । विश्वेन सहसा

सह । द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम्। ओं ह्रां (१२) मित्रविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः, इदमर्घ्यं समर्पयामि ॥ एवं त्रिः ॥ ३ ॥ मित्रादिद्वादशवाक्यैः षोडशोपचारपूजां कृत्वाऽनन्तरमर्घ्यपूर्वकनमस्कारं च कुर्यात् । पुनः एवं रीत्या करहृदयादिन्यासं कुर्यात्)

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तद्दचाम-ण्डलꣳ स ऋचाᳬलोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नाᳬलोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि

यजूꣳषि स यजुषामण्डलꣳ स यजुषाꣳलोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः । संज्ञा...नमः, इदमर्घ्यम् ॥

आदित्यो वै तेज ओजो बलꣳयशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तथ्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयम्भु ब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् । संज्ञा...नमः, इदमर्घ्यम् ॥

घृणिः सूर्य आदित्यो न प्र भावात्यक्षरम् । मधु क्षरन्ति

तद्रसम् । सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुव-रोम् । संज्ञाछायादेवीसमेतश्रीसूर्यनारायणस्वामिने नमः, प्रसन्नार्घ्यं समर्पयामि ॥

तरणिर्विश्वदर्शितो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिस्सूर्याय त्वा भ्राजस्वते ॥ संज्ञा...मिने नमः, इदमर्घ्यं समर्पयामि ॥

अथनमस्कारः ॥

ओं गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रव-

स्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ श्रीमहागणपतये नमः ॥

ओम्, अग्निमीळे पुरोहितंयँज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ऋग्वेदात्मने सूर्यनारायणस्वामिने नमः ॥

ओम्, इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ यजुर्वेदात्मने सूर्यनारायणस्वामिने नमः ॥

ओम्, अग्न आ याहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ सामवेदात्मने सूर्यनारायणस्वामिने नमः ॥

ओम्, शं नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोः

रभि स्रवन्तु नः ॥ अथर्वणवेदात्मने सूर्यनारायणस्वामिने नमः ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥
गुरुर्ब्रह्मा गुरुर्विष्णुगुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

श्रीगुरुचरणारविन्दाभ्यां नमः ॥

ओं भूर्भुवः सुवः । ओं ह्रीम्, उद्यन्नद्य मित्रमहः । ओं भूर्भुवः सुवः । ओं ह्रां मित्राय नमः ॥ १ ॥

ओं भूर्भुवः सुवः । ओं ह्रीम्, आरोहन्नुत्तरां दिवम् । ओं भूर्भुवः सुवः । ओं ह्रीं रवये नमः ॥ २ ॥

ओं भूर्भुवः सुवः । ओं ह्रूम्, हृद्रोगं मम सूर्य । ओं भूर्भुवस्सुवः । ओं ह्रूं सूर्याय नमः ॥ ३ ॥

ओं भूर्भुवः सुवः । ओं ह्रैम्, हरिमाणं च नाशय । ओं भूर्भुवः सुवः । ओं ह्रैं भानवे नमः ॥ ४ ॥

ओं भूर्भुवः सुवः । ओं ह्रौम्, शुकेषु मे हरिमाणम् । ओं भूर्भुवः सुवः । ओं ह्रौं स्वगाय नमः ॥ ५ ॥

ओं भूर्भुवः सुवः । ओं ह्रः, रोपणाकासु दध्मसि । ओं

भूर्भुवः सुवः । ओं ह्रः पूष्णे नमः ॥ ६ ॥
ओं भूर्भुवः सुवः ओं ह्राम्, अथो हारिद्रवेषु मे । ओं
भूर्भुवः सुवः । ओं ह्रां हिरण्यगर्भाय नमः ॥ ७ ॥
ओं भूर्भुवः सुवः । ओं ह्रीम्, हरिमाणं निदध्मसि । ओं
भूर्भुवः सुवः । ओं ह्रीं मरीचये नमः ॥ ८ ॥
ओं भूर्भुवः सुवः । ओं ह्रूम्, उदगादयमादित्यः । ओं
भूर्भुवः सुवः । ओं ह्रूम्, आदित्याय नमः ॥ ९ ॥
ओं भूर्भुवः सुवः । ओं ह्रैम्, विश्वेन सहसा सह । ओं

भूर्भुवः सुवः । ओं ह्रैं सवित्रे नमः ॥ १० ॥

ओं भूर्भुवः सुवः । ओं ह्रौम्, द्विषन्तं मम रन्धयन्न् । ओं भूर्भुवः सुवः । ओं ह्रौम्, अर्काय नमः ॥ ११ ॥

ओं भूर्भुवः सुवः । ओं ह्रः । मो अहं द्विषतोरधम् । ओं भूर्भुवः सुवः ॥ ओं ह्रः, भास्कराय नमः ॥ १२ ॥

ओं भूर्भुवः सुवः । ओं ह्रां ह्रीम्, उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं मित्र-रविभ्यां नमः ॥ १३ ॥

ओं भूर्भुवः सुवः । ओं ह्रूं ह्रैम्, हृद्रोगं मम सूर्य । हरि-

माणं च नाशय । ओं भूर्भुवः सुवः । ओं ह्रूं ह्रैं सूर्यभानुभ्यां नमः ॥ १४ ॥

ओं भूर्भुवः सुवः । ओं ह्रौं ह्रः, शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि । ओं भूर्भुवः सुवः । ओं ह्रौं ह्रः, खगपूषभ्यां नमः ॥ १५ ॥

ओं भूर्भुवः सुवः । ओं ह्रां ह्रीम्, अथो हारिद्रवेषु मे । हरिमाणं नि दध्मसि । ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं हिरण्यगर्भ-मरीचिभ्यां नमः ॥ १६ ॥

ओं भूर्भुवः सुवः । ओं ह्रूं ह्रैम्, उदगादयमादित्यः । विश्वेन सहसा सह । ओं भूर्भुवः सुवः । ओं ह्रूं ह्रैम्, आदित्य-सवितृभ्यां नमः ॥ १७ ॥

ओं भूर्भुवः सुवः । ओं ह्रौं ह्रः, द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम् । ओं भूर्भुव सुवः । ओं ह्रौं ह्रः, अर्क-भास्कराभ्यां नमः ॥ १८ ॥

ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं ह्रूं ह्रैम्, उद्यन्नद्य मित्र-महः । आरोहन्नुत्तरां दिवम् । ह्रद्रोगं मम सूर्य । ह्रिरिमाणं च नाशय । ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं ह्रूं ह्रैं मित्रविसूर्यभानुभ्यो नमः ॥ १९ ॥

ओं भूर्भुवः सुवः । ओं ह्रौं ह्रः, ह्रां ह्रीम्, शुकेषु मे हरि-माणम् । रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे । हरिमाणं नि दध्मसि । ओं भूर्भुवः सुवः । ओं ह्रौं ह्रः, ह्रां ह्रीं खगपूषहिरण्य-गर्भमरीचिभ्यो नमः ॥ २० ॥

ओं भूर्भुवः सुवः । ओं ह्रूं ह्रैं ह्रौं ह्रः, उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतो-रधम् । ओं भूर्भुव सुवः । ओं ह्रूं ह्रैं ह्रौं ह्रः, आदित्यसवित्रर्क-भास्करेभ्यो नमः ॥ २१ ॥

ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे । हरिमाणं नि दध्मसि । उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन्न् । मो अहं द्विषतोरधम् । ओं भूर्भुवः सुवः । ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, मित्रविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः ॥ २१ ॥ (एवं त्रिः । ३)...२४ ॥

ओं तत्सत् ॥

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

नमस्कारः ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्त्वा क्षमस्व परमेश्वर ॥

अनेन सूर्यनमस्कारेण भगवान्त्सर्वात्मकः संज्ञाछायादेवी-समेतश्रीसूर्यनारायणः सुप्रीतः सुप्रसन्नो वरदो भवतु॥ब्रह्मार्पणमस्तु॥

इति सूर्यनमस्कारः समाप्तः ॥

॥ अथ श्रीसूर्यनारायणाष्टाक्षरीमहामन्त्रजपक्रमः ॥

एवंगुणेत्यादिशुभतिथौ श्रीसूर्यनारायणाष्टाक्षरीमहामन्त्रजपं करिष्ये ॥

अस्य श्रीसूर्यनारायणाष्टाक्षरीमहामन्त्रस्य । देवभार्गव ऋषिः । अनुष्टुप्छन्दः । श्रीसूर्यनारायणो देवता । ह्रां बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । संज्ञाछायादेवीसमेत श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि षडङ्गन्यासः । ओं भूर्भुवः सुवरोमिति दिग्बन्धः ॥

॥ ध्यानम् ॥

रक्ताब्जयुग्माभयदानहस्तं केयूरहाराङ्गदकुण्डलाढ्यम् ।
माणिक्यमौलिं दिननाथमीडे बन्धूककान्तिं विलसत्त्रिनेत्रम् ॥

लम्, पृथिव्यात्मने गन्धं समर्पयामि । अम्, आकाशात्मने पुष्पं समर्पयामि । यम्, वाय्वात्मने धूपमाघ्रापयामि । रम्, अग्न्यात्मने दीपं दर्शयामि । वम्, अमृतात्मनेऽमृतनैवेद्यं समर्पयामि । सम्, सर्वात्मने ताम्बूलादिसर्वोपचारपूजाः समर्पयामि ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।

गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

अष्टाक्षरीमन्त्रः ॥

ओं घृणिः सूर्य आदित्यः ॥

(इत्यष्टाक्षरीमन्त्रजपं कुर्यात् । पुनर्न्यासं कृत्वा,) ओं भूर्भुवः सुवरोमिति' दिग्विमोकः ॥ अनेन सूर्यनारायणाष्टाक्षरीमन्त्रजपेन संज्ञाछायादेवीसमेतश्रीसूर्यनारायणः सुप्रीतः सुप्रसन्नो वरदो भवतु ॥

एतत्फलं श्रीकृष्णार्पणमस्तु ॥

इति श्रीसूर्यनारायणाष्टाक्षरीमहामन्त्रजपः समाप्तः ॥

॥ ब्रह्मयज्ञः ॥

एवंगुणेत्यादिशुभतिथौ मम श्रौतस्मार्तनित्यकर्मानुष्ठान-योग्यतासिद्ध्यर्थं देवर्षिपितॄनुद्दिश्य देवर्षिपितृप्रीत्यर्थं ब्रह्मयज्ञेन सद्यो यक्ष्ये ॥

ओं विद्युदसि विद्य मे पाप्मानमृताध्सत्यमुपैमि ॥ अप उपस्पृश्य ॥ हस्तावव॒निज्य॒ त्रिराचामेद्विः परि॒मृज्य॑ स॒कृदु॒पस्पृ॑श्य॒

शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य । यथ्सव्यं पाणिं पादौ प्रोक्षति । दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीतापां वा एष ओषधीनाꣳ रसो यद्दर्भाः सरसमेव ब्रह्म कुरुते दक्षिणोत्तरौ पाणी पादौ कृत्वा सपवित्रावोमिति प्रति पद्यत एतद्वै यजुष्मयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाऽभ्युक्तमृचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुर्यस्तन्न वेद् किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ओं भूः । तथ्सवितुर्वरेण्यम् । ओं भुवः । भर्गो देवस्य धीमहि । ओꣳ सुवः । धियो यो नः प्रचोदयात् ॥ ओं भूः । त...धीमहि । ओं भुवः । धि...

यात् । ओꣳसुवः । त...यात् । ओं भूर्भुवः सुवः । तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ सत्यं तपः श्रद्धायां जुहोमि ॥ श्रीगुरुभ्यो नमः, हरिः ओ४म् ॥ इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माऽघशꣳसो रुद्रस्य हेतिः परि वो वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ हरिः ओ (३)म् ॥ हरिः ओ(४)म् ॥ अग्निमीळे पुरोहितꣳयज्ञस्य

देवमृत्विजम्। होतारं रत्नधातमम् ॥ हरिः ओम् ॥ (२)॥ अग्न आ याहि वीतये गृणानो हव्यदातये । निहोता सश्सि बर्हिषि ॥ हरिः ओम् ॥(२) शं नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ हरिः ओ(३)म् ॥

हरिः ओ(४)म् ॥ ब्रह्म सन्धत्तं तन्मे जिन्वतम् । क्षत्रꣳ सन्धत्तं तन्मे जिन्वतम् । इषꣳ सन्धत्तं तां मे जिन्वतम् । ऊर्जꣳ सन्धत्तं तां मे जिन्वतम् । रयिꣳ सन्धत्तं तां मे जिन्वतम् । पुष्टिꣳ सन्धत्तं तां मे जिन्वतम् । प्रजाꣳ सन्धत्तं तां मे जिन्वतम् ।

पशून्थसन्धत्तं तान्मे जिन्वतम् । स्तुतोऽसि जनधाः । देवास्त्वा शुक्रपाः प्र णयन्तु॥सुवीराः प्रजाः प्रजनयन्परीहि॥ हरिः ओ(३)म्॥

हरिः ओ(४)म् । सं(२)ज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । सङ्कल्पमानं प्रकल्पमानमुपकल्पमानमुपकॢप्तं कॢप्तम् । श्रेयो वसीय आयथ्सम्भूतं भूतम् । हरिः ओ(३)म् ॥

हरिः ओ(४)म् । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितꣳयं-

दायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । हरिः ओ(३)म् ॥

हरिः ओ(४)म् । प्रसुग्मन्ता धियसानस्य सक्षणिः । हरिः ओ(३)म् ॥

हरिः ओ(४)म् । अथ वर्णसमाम्नायः ॥ हरिः ओम् ॥ (२) अ इ उण् । ऋ लृक् । ए ओङ् । ऐ औच् । ह य व रट् । लण् । ञ म ङ ण नम् । झ भञ् । घ ढ धष् । ज ब ग ड दश् । ख

फ छ ठ थ च ट तव् । क पय् । श ष सर् । हल् । इति माहे-
श्वराणि सूत्राणि ॥ हरिः ओम् ॥(२)॥ वृद्धिरादैच् । अदेङ् गुणः ।
इको गुणवृद्धी । न धातुलोप आर्धधातुके ॥ हरिः ओम् ॥ (२) ॥
म य र स त ज भ न ल ग सम्मितम् । भ्रमति वाङ्मयं यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः॥ हरिः ओम् ॥(२)॥
योगीश्वरं याज्ञवल्क्यम् । नारायणं नमस्कृत्य ॥ हरिः ओम् ॥(२)॥
अथातो दर्शपूर्णमासौ व्याख्यास्यामः ॥ हरिः ओम् ॥ (२) ॥
अथातो धर्मजिज्ञासा ॥ हरिः ओम् ॥(२)॥ अथातो ब्रह्मजिज्ञासा॥

हरिः ओम् ॥ (२)॥ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि । ओं शान्तिः शान्तिः शान्तिः ॥ (एवं त्रिः)॥ वृष्टिरसि वृश्च मे पाप्मानमृताथ्सत्यमुपागाम् ॥

प्राणानायम्य । एवंगुणेत्यादिशुभतिथौ ब्रह्मयज्ञाङ्गदेवर्षि-पितृतर्पणं करिष्ये । ब्रह्मादयो ये देवास्तान्देवाꣳ...स्तर्पयामि । सर्वान्देवाꣳ...मि । सर्वान्देवगणाꣳ...मि । सर्वान्देवपुत्राꣳ...मि । सर्वान्देवपौत्राꣳ...मि । सर्वा देवगणपत्नीः...मि । भूर्देवाꣳ...मि ॥ भुवर्देवाꣳ...मि । सुवर्देवाꣳ...मि । भूर्भुवः सुवर्देवाꣳ

...मि ॥ (निवीती) कृष्णद्वैपायनादयो॰ य ऋषयस्तानृषीꣳस्तर्पया-
मि तर्पयामि । सर्वानृषीꣳ...मि । (२) सर्वर्षिगणाꣳ...मि । (२)
सर्वर्षिपुत्राꣳ...मि । (२) सर्वर्षिपौत्राꣳ...मि । (२) सर्वा ऋषि-
पत्नीः...मि । (२) भूर्ऋषीꣳ...मि । (२) सुवर्ऋषीꣳ...मि । (२)
सुवर्ऋषीꣳ...मि । (२) भूर्भुवः सुवऋषीꣳ...मि । (२) प्रजा-
पतिं काण्डर्षिः...मि । (२) सोमं...मि (२) अग्निं...मि । (२)
विश्वान्देवान्...मि । (२) साꣳहितीर्देवता उपनिषदस्त...मि ।
(२) याज्ञिकीर्देवता...मि । (२) वारुणीर्देवता—मि । (२) हृध्य-

वाहं...मि । (२) विश्वान्देवान्...मि । (२) ब्रह्माणग्गुँ स्वयम्भुवं त...मि । (२) (पुनः) विश्वान्...मि । (२) अरुणान्काण्डर्षीꣳ ...मि । (२) सदसस्पतिं त...मि ॥ (२) (प्राचीनावीती)सोमः पितृमान् यमोऽङ्गिरस्वानभिष्वात्ताग्निकव्यवाहनादयो ये पितरस्ता-न्पितॄꣳस्तर्पयामि तर्पयामि तर्पयामि । सर्वान्पितृ...मि । (३) सर्वान्पितृगणाꣳ...मि । (३) सर्वान्पितृपुत्राꣳ—मि । (३) सर्वान्पितृपौत्रा...मि । (३) सर्वाः पितृपत्नीस्त...मि । (३) भूः पितॄꣳस्त...मि । (३) भुवः पितॄꣳ...मि । (३) सुवः पितॄꣳ ...मि । (३) भूर्भुवः सुवः पितॄꣳ...मि । (३) (अनन्तरं पित्रा-

दितर्पणम्) आचार्यादीꣳ...ङ्गि । (३) सर्वान्कारुण्यपितॄꣳस्तर्प-यामि तर्पयामि तर्पयामि ॥ (आचम्य)

इति ब्रह्मयज्ञः समाप्तः ॥

V. Ramaswamy Sastrulu & Sons, at the 'Varilla' Press, Madras.—1941

॥ श्रीमद्वाल्मीकिरामायणम् ॥

॥ द्राविडपदार्थसहितकाण्डाः ॥

	रू.	अ
मूलम् (सकौशेयबन्धम्)	५	०
,, सम्पुटद्वयम्(सवस्त्रबन्धम्)	६	०
,, बालकाण्डः ,,	१	०
,, अयोध्याकाण्डः ,,	१	१२
,, आरण्यकाण्डः ,,	१	०
,, किष्किन्धाकाण्डः ,,	१	०
,, सुन्दरकाण्डः ,,	१	०
,, युद्धकाण्डः ,,	२	४

	रू.	अ.
बालकाण्डः अयोध्याकाण्डः आरण्यकाण्डः किष्किन्धाकाण्डः	मुद्रणे	
सुन्दरकाण्डः	६	८
युद्धकाण्डः	मुद्रणे	

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्
२९२, एस्प्लनेड्, चेन्नपुरी.

॥ बृहत्स्तोत्ररत्नाकरः ॥

(भागद्वयात्मकः)

भोस्सहृदयाः, विज्ञापयामो वयं किमपि भवत्सु,

अधुनाकिल, अस्मन्मुद्रणालये देवनागरीलिपिभिस्सञ्जात मुद्रणानि सर्वमतपरिग्रहक्षमाणि सर्वदा सुलभसङ्ग्रहणानि कवच, हृदय, पूजा, मन्त्राष्टोत्तरशतसहस्रनामादिसंवलितानि च कानि चन स्तोत्रजालान्यत्र सार्वजनीनपारायणादिसौकर्यसम्पिपादयिषया प्राकाश्यमनैष्म ।

इत्थं भवद्विधेयाः

वाविल्ल रामस्वामिशास्त्रुलु अण्ड् सन्स्,

व्यापकाः.

॥ क्रय्यपुस्तकानि ॥

संस्कृतबालशिक्षा, आन्ध्रलिप्या समलंकृता, श्रीरामायणसङ्ग्रह-सहिता च संस्कृतान्ध्राक्षरजिज्ञासूनामत्युपयोगिनी	...	०	३
पञ्चसूक्तानि सस्वराणि	... ...	०	२
संस्कृतान्ध्रवर्णबोधिनी, पत्रफलका	... ...	०	२
शब्दमञ्जरी (दृढपत्रात्मिका)	... ...	०	४
महाकविबोधायनकृतभगवदज्जुकनाटकम्	... ...	०	६
रामकर्णामृतम्	... ...	०	८
रुद्रनमकचमकम्—सस्वरम्	... ...	०	२

श्रीमद्भगवद्गीता—(मूलमात्रम्)	...	...	०	४
भर्तृहरिशतकत्रयम्—(मूलम्)	...	...	०	८
हंससन्देशः सङ्ख्याख्यः	...	...	०	६
श्रीकृष्णकर्णामृतम्—(मूलम्)	...	...	०	६
सुभाषितमञ्जरी	...	...	०	६

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,

२९२, एस्प्लनेड्, चेन्नपुरी.